**त्रिपुरान्तक** पु० त्रिपुरस्यान्तं करोति अन्त–णिच्–ण्वुल्। शिवे अमरः।

**त्रिपुरारि** पु० ६त०। शिवे "त्रिपुरारिशिरश्चारि" गङ्गास्तवः।

**त्रिपुरुष** न० त्रयाणां पुरुषाणां समाहारः। १पित्रादिपुरुषत्रये। "क्रमात्त्रिपुरुषागता" स्मृतिः। त्रयः पुरुषाः पित्रादयो भोक्तारो यस्य। २भोगभेदे पु०। त्रिपूरुषादयोऽप्यत्र। व्यासः "प्रपितामहेन यद्भुक्तं तत् पुत्रेण विना च तम्। तौ विना यस्य भोगः स्यात् स विज्ञेयः त्रिपूरुषः। पिता पितामहो यस्य जीवेच्च प्रपितामहः। त्रयाणां जीवतां भोगो विज्ञेयस्त्वेकपूरुषः" व्यव०त०। त्रयः पुरुषाः परिमाणमस्याः ठन् तस्य लुक्। ३पुरुषत्रयपरिमिते त्रि० "अथ त्रिपुरुषां रज्जुं मिमीते" शत०ब्रा०१०।२।१२। वा ङीप्। त्रिपुरुषीत्यप्यत्र।

**त्रिपुषा** स्त्री त्रीन् वातादिदोषान् पुष्णाति पुष–क। कृष्णत्रिवृति (कालतेओड़ि) शब्दच०।

**त्रिपुष्कर** न० त्रयाणां पुष्कराणां समाहारः। १पुष्करत्रये ब्रह्मकृततीर्थभेदे २ज्येष्ठमध्यमकनिष्ठभेदेषु त्रिषु पुष्कराभिधह्रदेषु। ३नक्षत्रतिथिवारयोगभेदे पु०। "वाराः क्रूरास्तिथिर्भद्रा नक्षत्रं भग्नपादकम्। जातेऽत्र जारजो योगो मरणेऽत्र त्रिपुष्करः" ज्यो०त०। स्वार्थे न अण्। त्रैपुष्करोऽप्यत्र पु० "भद्रातिथौ रविजभूतनयार्कवारे द्वीशार्यमाजचरणादितिवह्निवैश्वे। त्रैपुष्करो भवति मृत्युविनाशवृद्धौ त्रैगुण्यदो द्विगुणकृद्वसुतक्षचान्द्रे" मु० चि०।

"अथ त्रिपुष्करयोगं सफलं वसन्ततिलकयाह भद्रेति भद्रासंज्ञिका तिथिः द्वितीया सप्तमी द्वादशी तथा शनिभौमसूर्य्यवारेषु तथा द्वीशं विशाखा अर्यमोत्तराफाल्गुनी अजचरणः पूर्वभाद्रपदा अदितिः पुनर्वसुः वह्निः कृत्तिका विश्वमुत्तराषाढ़ा एषु षट्सु नक्षत्रेषु उक्ततिथिवारनक्षत्ररूपे विशिष्टयोगे सति त्रिपुष्कर एव त्रैपुष्करः प्रज्ञादिभ्यश्चेति स्वार्थेऽण्। त्रिपुष्करयोगो भवतीत्यर्थः कीदृशः। मृत्युविनाशवृद्धौ त्रैगुण्यदः तद्दिने यदि कश्चित् म्रियेत तदा तदीयास्तत् सहितास्त्रयो म्रियेरन् यदि किञ्चिद्वस्तु विनष्टं तदा तस्य वस्तुत्रयनाशः तथा किञ्चिद्वस्तु लब्धं तदा त्रिगुणतद्वस्तुलाभः इत्यर्थः उक्तञ्च वसिष्ठेन। "रविरविजभौमवारे भद्रायां विषमपादनक्षत्रे चेत्। त्रैपुष्कराख्ययोगः त्रिगुणफलो यमलभैर्द्विगुणः"। नारदेनापि। "अर्कार्किभौमवारे चेद्भद्रायां विषमाङ्घ्रिभम्। त्रिपुष्करः त्रिगुणदो द्विगुणो यमलाङ्घ्रिभे"। अत्र यस्मिन्नक्षत्रे प्रथमपादान्ते तृतीयपादान्ते वा राशिसमाप्तिस्तद्विषमपादनक्षत्रमुच्यते तदेव स्पष्टं द्वीशार्यमेत्यादिनोपनिबद्धम् अथ वासवोधनिष्ठा तक्षा चित्रा चान्द्रं मृगः एतानि भानि भद्रास्तिथयः रविजभूतनयार्कवाराश्च अत्रापि विशिष्टयोगे सति द्विपुष्करनामा योगो भवति तत्फलं मृत्युविनाशवृद्धौ द्वैगुण्यकृत् मृते नष्टे वृद्धौ द्विगुणतां करोतीत्यर्थः "द्विगुणो यमलाङ्घ्रिभे" इत्युक्तेः यन्नक्षत्रे द्वितीयचरणान्ते राशिसमाप्तिस्तद्यमलाङ्घ्रिभं तच्च मृगचित्राधनिष्ठारूपमेव। अथ दैवात्त्रिपुष्करादिके तिथिवारनक्षत्रात्मके विशिष्टयोगे सति कस्यचिन्मरणसम्भवस्तदा तद्दोषशान्त्यर्थं दानं विधेयं यथाह वसिष्ठः "त्रितयं गवां हि दद्याद्दोषस्यापनुत्तये विद्वान्। द्वितयं द्विपुष्करेऽपि च तिलपिष्टैर्विप्रमुख्येभ्यः"। द्वितयं गवामिति शेषः अत्र तिथिवाराभावे केवलं विषमाङ्घ्रिभे यमलाङ्घ्रिभे वा मरणसम्भवे दोषो नास्तीत्यर्थः। अमुमर्थं स्पष्टमाह नारदः "प्रदद्याद्दोषनाशाय गोत्रयं मूल्यमेव वा। द्विपुष्करे द्वयं दद्यान्न दोषस्त्वृक्षमात्रतः" इति। अत्र त्रिपुष्करयोगे क्वचिद्बृहस्पतिवारोऽप्युक्तः यथाह कश्यपः "भद्रा तिथिः शनीज्यारवारे चेद्विषमाङ्घ्रिभम्। त्रिपुष्करं त्रिगुणदं द्विगुणं द्व्यङ्घ्रिभे मृताविति" इदमेव दृष्ट्वा श्रीपतिनाप्युक्तम्। "विषमचरणं धिष्ण्यं भद्रा तिथिर्यदि जायते सुरगुरुशनिक्ष्मापुत्राणां कथञ्चन वासरे। मुनिभिरुदितः सोऽयं योगः त्रिपुष्करसंज्ञितः त्रिगुणफलदो वृद्धौ नष्टे हृते च मृतेऽपि वा"। अस्य पूर्वोक्तवाक्यस्य चैकवाक्यतां देवाः कर्तुमर्हन्ति। कश्यपवाक्ये मृताविति पदोपादानान्मरण एवायं विचारो न तु नष्टे वृद्धौ च यदुक्तं ब्रह्मपुराणेऽपि "धनिष्ठापञ्चके जीवो मृतो यदि कथञ्चन। त्रिपुष्करे याम्यभे च कुलजान्मारयेत् ध्रुवम्। तदनिष्टविनाशार्थं विधानं समुदीरयेदिति" पी० धा०।

**त्रिपुष्ट** पु० त्रयः धर्म्मार्थकामाः पुष्टा अस्य। १प्राजापत्ये राजभेदे हेमच०। [ स्थिते सत्यलोके हेमच०।

**त्रिपृष्ठ** न० त्रयाणां लोकानां पृष्ठः समाहारः। त्रिपृष्ठ-

**त्रिपौरुष** त्रि० त्रीन् पित्रादीन् पुरुषान् व्याप्नोति अण् उत्तरपदवृद्धिः। पित्रादिक्रमेण पुरुषत्रयव्यापके भोगादौ। त्रिपुरुषशब्दे दृश्यम्। स्त्रियां ङीप्